# Shri Shastrijimaharaja Pranama Ashtakam

# श्रीशास्त्रिजीमहाराज प्रणामाष्टकम्

## Document Information

Text title : Shri Shastrijimaharaja Pranama Ashtakam

File name : shAstrijImahArAjapraNAmAShTakam.itx

Category : deities_misc, svAminArAyaNa, gurudev, aShTaka

Location : doc_deities_misc

Author : jeThAlAla

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीशास्त्रिजीमहाराज प्रणामाष्टकम्

(शार्दूलविक्रीडितम्)
वैराग्येण दृढेन बाल्यवयसि त्यक्त्वा गृहं बान्धवान्
अन्विष्टाच्च सुतोषिताच्च गुरुतो विज्ञानमासाद्य च ।
सद्बोधेन विमोचयस्यनुगतान् देशे मुमुक्षूनटन्
पूजार्हं प्रणमामि यज्ञपुरुषं शास्त्रप्रवीणं मुदा ॥ १॥

शुश्रूषां कृतवान् गुरोरगणयन् प्राग्जेरुपाधीन् बहून्
सेवाया अचलं व्रतं धृतवता भीतं न कस्मादपि ।
आज्ञां पालयतानुभूतमतुलं शारीरकष्टं गुरोः
पूजार्हं प्रणमामि यज्ञपुरुषं शास्त्रप्रवीणं मुदा ॥ २॥

शास्त्रं जीवणरङ्गतः श्रुतवता वेदादि ताभ्यां त्वया
साकार-प्रकटेश्वराक्षरपते-रध्यापितोपासना ।
शास्त्रार्था विहिताः सभासु विजिता वादैः प्रतिस्पर्धिनः
पूजार्हं प्रणमामि यज्ञपुरुषं शास्त्रप्रवीणं मुदा ॥ ३॥

कारुण्येन वसुन्धरां हरिवरो युक्तोऽक्षरेणाययौ
आज्ञा श्रीहरिणा कृता प्रथयितुं भक्तिं हरेरीदृशीम् ।
आज्ञां पालयता दुराग्रहवतां सोढास्त्वयोपद्रवाः
पूजार्हं प्रणमामि यज्ञपुरुषं शास्त्रप्रवीणं मुदा ॥ ४॥

श्रीबोचासणधाम-रम्यासिक्ताः पूताः पदैः श्रीहरेः
सङ्कल्पो विहितस्त्वयाक्षरपते-मूर्तिप्रतिष्ठापने ।
भक्तेभ्येऽक्षरमन्दिरं रचयता प्रौढं महो दर्शितं
पूजार्हं प्रणमामि यज्ञपुरुषं शास्त्रप्रवीणं मुदा ॥ ५॥

श्रद्धायुक्त-मुमुक्षुरेत्य शरण कुर्याद् भवत्सेवनां
सन्तापांस्त्रिविधान्निवार्य सकलान् भूयाद् भवान् शान्तिदः ।
देहो भक्तहितार्थमेव भवता ब्रह्मार्पितो धार्यते

पूजार्हं प्रणमामि यज्ञपुरुषं शास्त्रप्रवीणं मुदा ॥ ६॥

धर्मज्ञान-विरागभक्तय इमे एकान्तिकानां गुणाः
चत्वारश्च भवन्ति पञ्चममिदं शुश्रूषणं श्रीहरेः ।
श्रेयस्कारिगुणाः हरेर्मुनिवरं त्वां भूषयन्तेऽखिलाः
पूजार्हं प्रणमामि यज्ञपुरुषं शास्त्रप्रवीणं मुदा ॥ ७॥

नामोच्चारमहित्वमेव मलिनं सङ्कल्पमाखण्डते
किञ्चान्तःशरणं प्रशामयति यत् संसारचक्रानलान् ।
यत्पादाम्बुजलोलुपा हरिजना गायन्ति शुभ्रं यश-
स्तस्मिन् यज्ञपुरुषदास-चरणे प्रीत्या नमस्यास्तु मे ॥ ८॥

इति श्रीजेठालालस्वामिनारायणविरचितं श्रीशास्त्रिजीमहाराज
प्रणामाष्टकं सम्पूर्णम् ।

*Shri Shastrijimaharaja Pranama Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*